श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः
श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

# ॥ नक्षत्रसूक्तम् ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

# ॥ नक्षत्रसू॒क्तम् ॥

अ॒ग्निर्नः॑ पातु॒ कृत्ति॑काः।
नक्ष॑त्रं दे॒वमि॑न्द्रि॒यम्।
इ॒दमा॑सां विचक्ष॒णम्।
ह॒विरा॒सं जु॑होतन।
यस्य॒ भान्ति॑ र॒श्मयो॒ यस्य॑ के॒तवः॑।
यस्ये॒मा विश्वा॒ भुव॑नानि॒ सर्वा᳚।
सकृत्ति॑काभिर॒भि सं॒वसा॑नः।
अ॒ग्निर्नो॑ दे॒वस्सु॑वि॒ते द॑धातु॥ १ ॥

प्र॒जाप॑ते रोहि॒णी वे॑तु॒ पत्नी᳚।
वि॒श्वरू॑पा बृह॒ती चि॒त्रभा॑नुः।
सा नो॑ य॒ज्ञस्य॑ सुवि॒ते द॑धातु।
यथा॒ जीवे॑म श॒रद॒स्सवी॑राः।
रो॒हि॒णी दे॒व्युद॑गात्पु॒रस्ता᳚त्।
विश्वा॑ रू॒पाणि॑ प्रति॒मोद॑माना।
प्र॒जाप॑तिग्ं ह॒विषा॑ व॒र्धय॑न्ती।
प्रि॒या दे॒वाना॒मुप॑यातु य॒ज्ञम्॥ २ ॥

सोमो॒ राजा॑ मृगशी॒र्षेण॒ आग॑न्।
शि॒वं नक्ष॑त्रं प्रि॒यम॑स्य॒ धाम॑।

आप्यायमानो बहुधा जनेषु।
रेतः प्रजां यजमाने दधातु।
यत्ते नक्षत्रं मृगशीर्षमस्ति।
प्रियग्ं राजन् प्रियतमं प्रियाणाम्।
तस्मै ते सोम हविषा विधेम।
शं न एधि द्विपदे शं चतुष्पदे॥ ३॥

आर्द्रया रुद्रः प्रथमान एति।
श्रेष्ठो देवानां पतिरघ्नियानाम्।
नक्षत्रमस्य हविषा विधेम।
मा नः प्रजाग्ं रीरिषन्मोत वीरान्।
हेती रुद्रस्य परिणो वृणक्तु।
आर्द्रा नक्षत्रं जुषताग्ं हविर्नः।
प्रमुञ्चमानौ दुरितानि विश्वा।
अपाघशग्ं सन्नुदतामरातिम्॥ ४॥

पुनर्नो देव्यदितिस्पृणोतु।
पुनर्वसू नः पुनरेता यज्ञम्।
पुनर्नो देवा अभियन्तु सर्वे।
पुनः पुनर्वो हविषा यजामः।
एवा न देव्यदितिरनर्वा।
विश्वस्य भर्त्री जगतः प्रतिष्ठा।
पुनर्वसू हविषा वर्धयन्ती।
प्रियं देवानामप्येतु पाथः॥ ५॥

बृ॒ह॒स्पति॑ः प्रथ॒मं जाय॑मानः।
ति॒ष्यं॑ नक्ष॑त्रम॒भि संब॑भूव।
श्रेष्ठो॑ दे॒वानां॒ पृत॑नासु जि॒ष्णुः।
दिशो॒ऽनु सर्वा॒ अभ॑यं नो अस्तु।
ति॒ष्य॑ः पु॒रस्ता॑दु॒त म॑ध्य॒तो न॑ः।
बृ॒ह॒स्पति॑र्नः॒ परि॑पातु प॒श्चात्।
बाधे॑तां॒ द्वेषो॒ अभ॑यं कृणु॒ताम्।
सु॒वीर्य॑स्य॒ पत॑यः स्याम॥ ६॥

इ॒दग्ं स॒र्पेभ्यो॑ ह॒विर॑स्तु जु॒ष्ट᳚म्।
आ॒श्रे॒षा येषा॑मनु॒यन्ति॒ चेत॑ः।
ये अ॒न्तरि॑क्षं पृथि॒वीं क्षि॒यन्ति॑।
ते न॑ः स॒र्पासो॒ हव॒माग॑मिष्ठाः।
ये रो॑च॒ने सू॒र्य॒स्यापि॑ स॒र्पाः।
ये दिवं॑ दे॒वीमनु॑ स॒ञ्चर॑न्ति।
येषा॑माश्रे॒षा अ॑नु॒यन्ति॒ काम᳚म्।
तेभ्य॑ः स॒र्पेभ्यो॒ मधु॑मज्जुहोमि॥ ७॥

उप॑हूताः पि॒तरो॒ ये म॒घासु॑।
मनो॑जवसः सु॒कृत॑ः सुकृ॒त्याः।
ते नो॒ नक्ष॑त्रे॒ हव॒माग॑मिष्ठाः।
स्व॒धाभि॑र्य॒ज्ञं प्रय॑तं जुषन्ताम्।
ये अ॑ग्निद॒ग्धा येऽन॑ग्निदग्धाः।
ये॑ऽमुं लो॒कं पि॒तर॑ः क्षि॒यन्ति॑।

याग्ँश्च॑ वि॒द्मयाग्ं॑ उ॑ च॒ न प्र॑वि॒द्म।
म॒घासु॑ य॒ज्ञग्ं सु॒कृ॑तं जु॒षन्ताम्॥ ८॥

गवा॒॑ पति॒ः फल्गु॒॑नीनामसि॒ त्वम्।
तद॑र्यमन्वरुण मित्र॒चारु॑।
तं त्वा॑ व॒यग्ं स॑नि॒तार॑ग्ं सनी॒नाम्।
जी॒वा जीव॑न्त॒मु॒प सं॑वि॑शेम।
येने॒मा विश्वा॒ भु॒व॑नानि॒ सञ्जि॑ता।
यस्य॑ दे॒वा अ॑नु॒सं॒यन्ति॒ चेत॑ः।
अ॒र्य॒मा राजा॒ऽजर॒स्तु॒वि॑ष्मान्।
फल्गु॒॑नीनामृष॒भो रो॑रवी॑ति॥ ९॥

श्रेष्ठो॑ दे॒वाना॑ं भगवो भगासि।
तत्त्वा॑ वि॒दु॒ः फल्गु॒॑नी॒स्तस्य॑ वित्तात्।
अ॒स्मभ्य॑ं क्ष॒त्रम॒जर॑ग्ं सु॒वीर्य॑म्।
गोम॒दश्व॑व॒दु॒प सन्नु॑दे॒ह।
भगो॑ ह दा॒ता भग॒ इत्प्र॑दा॒ता।
भगो॑ दे॒वीः फल्गु॒॑नी॒रावि॑वेश।
भग॒स्येत्तं प्र॑स॒वं ग॑मेम।
यत्र॑ दे॒वैः स॑ध॒माद॑ं मदेम॥ १०॥

आया॑तु॒ दे॒वः स॑वि॒तोप॑यातु॒।
हि॒र॒ण्यये॑न सु॒वृता॒ रथे॑न।
वह॒न्॒, हस्त॑ग्ं सु॒भग॑ग्ं वि॒द्म॒नाप॑सम्।

प्रयच्छन्तं पपुरिं पुण्यमच्छ।
हस्तः प्रयच्छत्वमृतं वसीयः।
दक्षिणेन प्रतिगृभ्णीम एनत्।
दातारमद्य सविता विदेय।
यो नो हस्ताय प्रसुवाति यज्ञम्॥ ११॥

त्वष्टा नक्षत्रमभ्येति चित्राम्।
सुभगं संसंयुवतिं रोचमानाम्।
निवेशयन्नमृतान्मर्त्यांश्च।
रूपाणि पिंशन्भुवनानि विश्वा।
तन्नस्त्वष्टा तदु चित्रा विचष्टाम्।
तन्नक्षत्रं भूरिदा अस्तु मह्यम्।
तन्नः प्रजां वीरवतीं सनोतु।
गोभिर्नो अश्वैः समनक्तु यज्ञम्॥ १२॥

वायुर्नक्षत्रमभ्येति निष्ट्याम्।
तिग्मशृंगो वृषभो रोरुवाणः।
समीरयन्भुवना मातरिश्वा।
अप द्वेषांसि नुदतामरातीः।
तन्नो वायुस्तदु निष्ट्या शृणोतु।
तन्नक्षत्रं भूरिदा अस्तु मह्यम्।
तन्नो देवासो अनुजानन्तु कामम्।
यथा तरेम दुरितानि विश्वा॥ १३॥

दू॒रम॒स्मच्छत्र॑वो यन्तु भी॒ताः ।
तदि॑न्द्रा॒ग्नी कृ॑णुतां॒ तद्विशा॑खे ।
तन्नो॑ दे॒वा अनु॑मदन्तु य॒ज्ञम् ।
प॒श्चात्पु॒रस्ता॒दभ॑यं नो अस्तु ।
नक्ष॑त्राणा॒मधि॑पत्नी॒ विशा॑खे ।
श्रेष्ठा॑विन्द्रा॒ग्नी भुव॑नस्य गो॒पौ ।
विषू॑चः॒ शत्रू॑नप॒बाध॑मानौ ।
अप॒क्षुध॑ꣳ नुदता॒मरा॑तिम् ॥ १४ ॥

पू॒र्णा प॒श्चादु॒त पू॒र्णा पु॒रस्ता᳚त् ।
उन्म॑ध्य॒तः पौ᳚र्णमा॒सी जि॑गाय ।
तस्यां᳚ दे॒वा अधि॑ सं॒वस॑न्तः ।
उ॒त्त॒मे नाक॑ इ॒ह मा॑दयन्ताम् ।
पृ॒थ्वी सु॒वर्चा॑ यु॒व॒तिः स॒जोषाः᳚ ।
पौ॒र्ण॒मा॒स्युद॑गा॒च्छोभ॑माना ।
आ॒प्या॒यय॑न्ती दु॒रि॒तानि॒ विश्वा᳚ ।
उ॒रुं दुहां॒ यज॑मानाय य॒ज्ञम् ॥ १५ ॥

ऋ॒द्ध्यास्म॑ ह॒व्यैर्नम॑सोप॒सद्य॑ ।
मि॒त्रं दे॒वं मि॑त्र॒धेयं॑ नो अस्तु ।
अ॒नू॒रा॒धान् ह॒विषा॑ व॒र्धय॑न्तः ।
श॒तं जी॑वेम श॒रदः॒ सवी॑राः ।
चि॒त्रं नक्ष॑त्र॒मुद॑गात्पु॒रस्ता᳚त् ।
अ॒नू॒रा॒धास॒ इति॒ यद्वद॑न्ति ।

तन्मित्र एति पथिभिर्देवयानैः।
हिरण्ययैर्विततैरन्तरिक्षे॥ १६ ॥

इन्द्रो ज्येष्ठामनु नक्षत्रमेति।
यस्मिन् वृत्रं वृत्रतूर्ये ततार।
तस्मिन्वयममृतं दुहानाः।
क्षुधं तरेम दुरितिं दुरिष्टिम्।
पुरन्दराय वृषभाय धृष्णवे।
अषाढाय सहमानाय मीढुषे।
इन्द्राय ज्येष्ठा मधुमद्दुहाना।
उरुं कृणोतु यजमानाय लोकम्॥ १७ ॥

मूलं प्रजां वीरवतीं विदेय।
पराच्येतु निरृतिः पराचा।
गोभिर्नक्षत्रं पशुभिः समक्तम्।
अहर्भूयाद्यजमानाय मह्यम्।
अहर्नो अद्य सुविते दधातु।
मूलं नक्षत्रमिति यद्वदन्ति।
पराचीं वाचा निरृतिं नुदामि।
शिवं प्रजायै शिवमस्तु मह्यम्॥ १८ ॥

या दिव्या आपः पयसा सम्बभूवुः।
या अन्तरिक्ष उत पार्थिवीर्याः।
यासामषाढा अनुयन्ति कामम्।

ता न॒ आप॒श्शग्ग् स्यो॒ना भ॑वन्तु।
याश्च॒ कूप्या॒ याश्च॑ ना॒द्याः॑ समु॒द्रियाः॑।
याश्च॑ वैश॒न्तीरु॒त प्रा॑स॒चीर्याः।
यासा॑मषा॒ढा मधु॑ भ॒क्षय॑न्ति।
ता न॒ आप॒श्शग्ग् स्यो॒ना भ॑वन्तु॥ १९ ॥

तन्नो॒ विश्वे॒ उप॑ शृण्वन्तु दे॒वाः।
तद॑षा॒ढा अ॒भिसंय॑न्तु य॒ज्ञम्।
तन्नक्ष॑त्रं प्रथतां प॒शुभ्यः॑।
कृ॒षिर्वृ॒ष्टिर्यज॑मानाय कल्पताम्।
शु॒भ्राः क॒न्या॑ युव॒तयः॑ सु॒पेश॑सः।
क॒र्म॒कृतः॑ सु॒कृतो॑ वी॒र्या॑वतीः।
विश्वा॑न्दे॒वान् ह॒विषा॑ व॒र्धय॑न्तीः।
अ॒षा॒ढाः काम॒मुप॑यान्तु य॒ज्ञम्॥ २० ॥

यस्मि॒न्ब्रह्मा॒भ्यज॑य॒त्सर्व॑मे॒तत्।
अ॒मुं च॑ लो॒कमि॒दमू॑च॒ सर्व॑म्।
तन्नो॒ नक्ष॑त्रमभि॒जिद्वि॒जित्य॑।
श्रियं॑ दधा॒त्वहृ॑णीयमानम्।
उ॒भौ लो॒कौ ब्रह्म॑णा॒ सञ्जि॑ते॒मौ।
तन्नो॒ नक्ष॑त्रमभि॒जिद्विच॑ष्टाम्।
तस्मि॑न्व॒यं पृत॑नाः सं ज॑येम।
तन्नो॑ दे॒वासो॒ अनु॑जानन्तु॒ काम॑म्॥ २१ ॥

शृ॒ण्वन्ति॑ श्रो॒णाम॒मृत॑स्य गो॒पाम्।
पु॒ण्या॑मस्या॒ उप॑शृणोमि॒ वाच᳚म्।
म॒हीं दे॒वीं विष्णु॑पत्नीमजू॒र्याम्।
प्र॒तीची॑ मेनाग्ं ह॒विषा॑ यजामः।
त्रे॒धा विष्णु॑रुरुगा॒यो विच॑क्रमे।
म॒हीं दिव॑ं पृथि॒वीम॒न्तरि॑क्षम्।
तच्छ्रो॒णैति॒ श्रव॑ इ॒च्छमा॑ना।
पु॒ण्य॒ग्ग्॒ श्लोकं॒ यज॑मानाय कृण्व॒ती॥ २२॥

अ॒ष्टौ दे॒वा वस॑वस्सो॒म्यासः॑।
चत॑स्रो दे॒वीर॒जराः॒ श्रवि॑ष्ठाः।
ते य॒ज्ञं पा᳚न्तु॒ रज॑सः पु॒रस्ता᳚त्।
सं॒व॒थ्स॒रीण॑म॒मृत॒ग्ग्॒ स्व॒स्ति।
य॒ज्ञं नः॑ पान्तु॒ वस॑वः पु॒रस्ता᳚त्।
द॒क्षि॒ण॒तो॑ऽभि॒यन्तु॒ श्रवि॑ष्ठाः।
पु॒ण्यं॒ नक्ष॑त्रम॒भि संवि॑शाम।
मा नो॒ अरा॑तिर॒घश॒ग्ं॒ साऽग॑न्॥ २३॥

क्ष॒त्रस्य॒ राजा॒ वरु॑णोऽधिरा॒जः।
नक्ष॑त्राणाग्ं श॒तभि॑ष॒ग्वसि॑ष्ठः।
तौ दे॒वेभ्यः॑ कृणुतो दी॒र्घमायुः॑।
श॒तग्ं स॒हस्रा॑ भेष॒जानि॑ धत्तः।
य॒ज्ञं नो॒ राजा॒ वरु॑ण॒ उप॑यातु।
तन्नो॒ विश्वे॑ अ॒भि संय॑न्तु दे॒वाः।

तन्नो॒ नक्ष॑त्रग्ं श॒तभि॑षग्जु॒षा॒णम्।
दी॒र्घमायु॒ः प्रति॑रद्भेष॒जानि॑॥ २४ ॥

अ॒ज एक॑पा॒दुद॑गात्पु॒रस्ता᳚त्।
विश्वा॑ भू॒तानि॑ प्रति॒ मोद॑मानः।
तस्य॑ दे॒वाः प्र॑स॒वं य॑न्ति॒ सर्वे᳚।
प्रो॒ष्ठ॒प॒दासो॑ अ॒मृत॑स्य गो॒पाः।
वि॒भ्राज॑मानः समिधा॒न उ॒ग्रः।
आऽन्तरि॑क्षमरुह॒दग॒न्द्याम्।
तग्ं सू॒र्यं॑ दे॒वम॒जमेक॑पादम्।
प्रो॒ष्ठ॒प॒दासो॒ अनु॑यन्ति॒ सर्वे᳚॥ २५ ॥

अहि॑र्बु॒ध्निय॒ः प्रथ॑मान एति।
श्रेष्ठो॑ दे॒वाना॑मु॒त मानु॑षाणाम्।
तं ब्रा᳚ह्म॒णाः सो॑म॒पाः सो॒म्यास॑ः।
प्रो॒ष्ठ॒प॒दासो॑ अ॒भिर॑क्षन्ति॒ सर्वे᳚।
च॒त्वार॒ एक॑म॒भि कर्म॑ दे॒वाः।
प्रो॒ष्ठ॒प॒दास॒ इति॒यान् वद॑न्ति।
ते बु॒ध्निय॑ं परि॒षद्य॑ग्ं स्तु॒वन्त॑ः।
अहि॑ग्ं रक्षन्ति॒ नम॑सोप॒सद्य॑॥ २६ ॥

पू॒षा रे॒वत्यन्वे॑ति॒ पन्था᳚म्।
पु॒ष्टि॒पती॑ पशु॒पा वाज॑बस्त्यौ।
इ॒मानि॑ ह॒व्या प्रय॑ता जु॒षा॒णा।

सुगेर्नो यानैरुपयातां यज्ञम्।
क्षुद्रान्पशून्रक्षतु रेवती नः।
गावो नो अश्वागं अन्वेतु पूषा।
अन्नगं रक्षन्तौ बहुदा विरूपम्।
वाजगं सनुतां यजमानाय यज्ञम्॥ २७ ॥

तदश्विनावश्वयुजोपयाताम्।
शुभं गमिष्ठौ सुयमेभिरश्वैः।
स्वं नक्षत्रगं हविषा यजन्तौ।
मध्वा सम्पृक्तौ यजुषा समक्तौ।
यौ देवानां भिषजौ हव्यवाहौ।
विश्वस्य दूतावमृतस्य गोपौ।
तौ नक्षत्रं जुजुषाणोपयाताम्।
नमोऽश्विभ्यां कृणुमोऽश्वयुग्भ्याम्॥ २८ ॥

अप पाप्मानं भरणीर्भरन्तु।
तद्यमो राजा भगवान्, विचष्टाम्।
लोकस्य राजा महतो महान् हि।
सुगं नः पन्थामभयं कृणोतु।
यस्मिन्नक्षत्रे यम एति राजा।
यस्मिंन्नेनमभ्यषिंचन्त देवाः।
तदस्य चित्रगं हविषा यजाम।
अप पाप्मानं भरणीर्भरन्तु॥ २९ ॥

निवेशनी सङ्गमनी वसूनां विश्वा रूपाणि वसून्यावेशयन्ती।
सहस्रपोषगं सुभगा रराणा सा न आगन्वर्चसा संविदाना।
यत्ते देवा अदधुर्भागधेयममावास्ये संवसन्तो महित्वा।
सा नो यज्ञं पिपृहि विश्ववारे रयिं नो धेहि सुभगे सुवीरम्॥ ३० ॥

ओं शान्तिः शान्तिः शान्तिः॥

॥ इति नक्षत्रसूक्तं समाप्तम्॥